No. ४५५९

Title आन सन्ध्याग्नि कर्म होम विधिः

Author ✗

Extent १६ Age १६८१

Subject सूत्र पद्धतिः

आवसथ्याग्निकर्महोमादिविधिः

~~[illegible]~~

४५५६

दी।हरि ऋष्म

आव स ख्याधार्म

दी। श्रीपादपनौविभाग

दी।जेन्द्रसूक्लौविभाग

प्रवास विश्वदेव
स्वनी लेत्रविध्य

४२०

इदं सूर्याय ॥ इदं प्रजापतये

सामितु

श्रीगणेशाय नमः ॥ आवसथ्याग्निः धर्महोमादितिख्याते ॥ ॐ परिसमुह्य ॥ २ ॥ ऋतं त्वा सत्येन परिषिंचामि ॥ ३ ॥ समितु प्रजापतये स्वाहा ॥ ॐ अग्नये स्वाहा ॥ प्रजापतये स्वाहा ॥ व्रीहिहोमः प्रजा० ॥ ऋतं त्वा० इति सायं होमविधिः ॥ अथ प्रातर्होमः ॥ परिसमुह्य ॥ २ ॥ सत्यं त्वर्तेन परिषिंचामि ॥ ३ ॥ ॐ सूर्याय स्वाहा ॥ प्रजा० समितु प्रजा० ॥ सत्यं त्वर्तेन परिषिंचामि ॥ इति प्रातर्होमः समाप्तः ॥ त्यागः ॥ ॐ इदमग्नये ॥ ॐ इदं प्रजापतये ॥ अथ विश्वदेवा नैत्य संस्कारः ॥ परिसमुह्य ॥ ३ ॥ सायं प्रातः कर्तव्यः समितु प्रजा० ॥ ॐ अग्नये स्वाहा ॥ सोमाय स्वाहा ॥ इन्द्राग्निभ्यां स्वाहा ॥ विष्णवे स्वाहा ॥ भरद्वाजे धन्वंतरये स्वाहा ॥ विश्वेभ्यो देवेभ्यः स्वाहा ॥ प्रजापतये स्वाहा ॥ आदितये स्वाहा ॥ अनुमतये स्वाहा ॥ अग्नये स्विष्टकृते स्वाहा ॥ समित्यर्युह्य ॥ बलिदानं ॐ अग्नये नमः सोमाय नमः इन्द्राग्निभ्यां नमः विष्णवे नमः भरद्वाज धन्वंतरये नमः ॐ अग्नये स्विष्टकृते नमः नमो ब्रह्मणे ब्राह्मणेभ्यो नमः ॥ वसिष्ठो वास्तोष्पते स्पष्ट ॥ वास्तोष्पते इति ॥ पूर्वे ॥ विश्वेभ्यो देवेभ्यो नमः अग्नये नमः आदितये नमः अनुमतये नम

नमः वास्तोष्पतये नमः नम इंद्राय ऐंद्रेभ्यो नमः नमो यमाय याम्येभ्यो न
मः नमो वरुणाय वारुणेभ्यो नमः। नमः सोमाय सौम्येभ्यो नमः नमो बृहस्पत
ये बार्हस्पतयेभ्यो नमः। नमो दितये आदित्येभ्यो नमः। नमो नक्षत्रेभ्यः। ऋ
तुभ्यः। मासेभ्यो नमः। अर्द्धमासेभ्यो नमः अहोरात्रेभ्यो नमः। संवत्सरेभ्यो न
मः प्रक्षेपथिकृते नमः। धात्रे नमः। विधात्रे नमः मरुद्भ्यो नमः। विष्णवे नमः वनस्पत
येनमः ओषधिभ्यो नमः पर्जन्याय नमः अद्भ्यो नमः नमः श्रियै चन्द्रकाल्यै नमः। नमः सर्वा
न्नपतये। नक्तंचरेभ्यो नमः रात्रि अहश्चरेभ्यो नमः जातः। परुच्छेपो विश्वेदेवास्त्रि
ष्टुप्। ये देवासः ध्वं नमः अविज्ञातेभ्यो देवताभ्यो नमः। धनपतये नमः। शेषः पि
नरस्त्रिष्टुप्। ये अग्निद ग्धाः स्वपितृभ्यो नमः। सनकादिमनुष्येभ्यो हंतः। श्व
भ्यो नमः। श्वपचेभ्यो नमः वयोभ्यो नमः। यक्ष्मैतानां क्रिमिभ्यो नमः। पापरोगेभ्यो
नमः। आयुषं प्रतिमंत्रं पंचभिः। तद्वयोः इति वैश्वदेवः समाप्तः॥ ॥

अथ भागाः ॥ उं इदमग्नये न मम ॥ इदं सोमाय न मम ॥ इदं मिंद्राग्निभ्यां न मम ॥
इदं विष्णवे न मम ॥ इदं भरद्वाज धन्वंतरये न मम ॥ इदं विश्वेभ्यो देवेभ्यो न
मम ॥ इदं प्रजापतये न मम ॥ इदमदितये न मम ॥ इदमनुमतये न मम ॥ इदं अ
ग्नये स्विष्टकृते न मम ॥ इदं नमो ब्रह्मणे ॥ इदं ब्राह्मणेभ्यो न मम ॥ इदं वास्तोष्पत
ये न मम ॥ इदमिंद्राय न मम ॥ इदमिंद्रेभ्यो न मम ॥ इदं यमाय ॥ यामेभ्यः ॥ इदं व
रुणाय ॥ इदं वारुणेभ्यः ॥ इदं सोमाय ॥ इदं सौम्येभ्यः ॥ इदं बृहस्पतये ॥ इदं बा
र्हस्पत्येभ्यः ॥ इदमदितये ॥ इदमादित्येभ्यः ॥ इदं नक्षत्रेभ्यः ॥ इदं ऋतुभ्यः ॥ इ
दमासेभ्यः ॥ इदमर्धमासेभ्यः ॥ इदमहोरात्रेभ्यः ॥ इदं संवत्सरेभ्यः ॥ इदं पूष्णे ॥२॥
पथिकृते ॥ इदं धात्रेभ्यः ॥ इदं विधात्रे ॥ इदं मरुद्भ्यः ॥ इदं विष्णवे ॥ इदं वनस्प
तये ॥ इदमोषधीभ्यः ॥ इदं पर्जन्याय ॥ इदमद्भ्यः ॥ द्याः ॥ इदं श्रियै न मम ॥ इदं
भद्रकाल्यै न मम ॥ इदं नमः सर्वान्नभूतये ॥ इदं नक्तंचरेभ्यः सा... ॥ इदं मह

अरेभ्यो नमम। भ्रातः। इदं लिंगोक्तदेवताभ्यो नम। इदं अविज्ञाताभ्यो दे
वताभ्यो नमम। इदं धनपतये नमम। इदं पितृभ्यः। इदं मनुष्येभ्यः। इदं श्व
भ्यः। इदं श्वपचेभ्यो नमम। इदं वयोभ्यो नमम। इदं गुष्मेतन्त्र नमम। इदं कि
विभ्यः। इदं पापरोगेभ्यो नमम। इति त्यागः॥ ॥ विश्वदेवपूर्वकं वृद्धि
श्राद्धे। अश्वारंभणयागो तिरव्यातः॥ आचमनं प्राणायामः३ स्वरूपयनं। अद्ये
त्यादि। अश्वारंभणयाग महं करिष्ये॥ ग्रहणं। अग्नाविष्णुभ्यां सरस्वत्यै स
रस्वते जुष्टं गृह्णामि ३ ॐ चतुर्थी। अग्नाविष्णुभ्यां सरस्वत्यै सरस्वते जु
ष्टं आसादयामि। अग्ना॰ ते वा जुष्टं प्रोक्षामि। प्रोक्षणं। आज्यभागौ तं कृत्वा च
तुर्गृहीतं कृत्वा। ॐ अग्नाविष्णुभ्यां स्वाहा। सरस्वत्यै स्वाहा। सरस्वते स्वाहा। अ
ग्नये स्विष्टकृते स्वाहा। अश्वारंभणयाग कर्मप्रतिष्ठासिध्यर्थं हिरण्यं

दे। आग्रायणया॰ यथासंपन्नं॰ ब्राह्मणमेकं अहं तर्पयिष्ये। आग्रायणया[ग]कर्मणो
यत्॰ ॥ इति आग्रायणयागः समाप्तः ॥ ॥ अथ पौर्णमासयागो [illegible] आ
चमनं प्राणायामः ॥ २ ॥ संकल्पनं। अद्येत्यादि। पौर्णमासी यजमानस्य पत्नीकस्य आत्मसं
स्कारार्थं स्मार्ताग्नौ पौर्णमासकर्म अहं करिष्ये। पंचभूसंस्कारः। अग्निप्रणयनम्
त्यग्निं प्रणीय तत्र (चो) परिसमूहनं। आस्वादनं। ब्रह्मासनं। प्रणीतासन
आत्मासनं च। अग्नेर्दक्षिणतो ब्रह्मस्थापनं। पुष्पैरर्चनं। अग्नेरुत्तरतः प्रणी
ताप्रणयनं। आपः प्रणयतीति पूरणं। पूजास्मरणं। पवित्रोत्पादनं। पवित्रे स्थः
इति पवित्रच्छेदनं ॥ ३ ॥ वेदस्यावित्यनुद्रेणं ॥ कुशातरुणान्योत्र दक्षिण
प्रणीत्रिः पर्युक्ष्य। महीनां पयोसीत्याज्यस्थालीमादाय इषे त्वेत्यधिश्र ॥ २ ॥
त्य। स्रुवः प्रतपनं। संमार्गः पुनः प्रतपनं। स्रुक् संमार्गः प्रतपनं अन्यूह
णाभ्यां मन्त्रणं स्याच्च ज्वे स्रुव उद्गाह्य। स्रुवे तदर्थं तत्त्वा ॥ सवितुः प्रस
१३

वरुत्पुनाम्याछिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः । इत्याज्यसंस्कारः । सवि
तुर्वः ॥ इत्युदकसंस्कारः । हविर्ग्रहणं ॥ अग्नये अग्नीषोमाभ्यां मग्नीषोमा
भ्यां जुष्टं गृह्णामि । निर्वपणं चतुर्थं ॥ अग्नये ग्नीषोमाभ्याम ग्नीषोमाभ्यां जुष्टमा
सादयामि । हविरासादनं । प्रोक्षणं । अग्नये ग्नीषोमाभ्याम ग्नीषोमाभ्यां वा
जुष्टं प्रोक्षामि । तेनोदकेन सर्वस्य प्रोक्षणं ॥ शेषोदकं प्रणीतासु । त्रिः प्रक्षालनं
अधिश्रयणं । श्रितानिधारणं । उदगुद्वासनं । पार्श्वप्रक्षालनं प्रत्यानिधारणं । दर्श
पूर्णमासयोः पंचदश समिधोमः । सप्तदशान्यत्र । कुशास्करयोर्ग्रहणं ॥ विष्णो
र्हस्तोसि । त्वमग्ने हिरण्यस्तूपोग्निर्जगतीत्वमग्ने अग्नं० स्य स्वाहा । यस्येमे हिरण्य
गर्भः कृत्तिस्पृपू० यस्येमे हिम० थेमस्वाहा । ॐ अग्नये स्वाहा ॥ उत्तरतः । सोमाय
स्वाहा दक्षिणतः चतुर्गृहीतं कृत्वा । ॐ अग्नये स्वाहा ॥ ॐ अग्नीषोमाभ्यां स्वाहा
ॐ अग्नीषोमाभ्यां स्वाहा ॥ ॐ अग्नये स्विष्टकृते स्वाहा । दक्षिणासंकल्पं ०

पाप्तकं व

पुण्याहं दीर्घमायुरस्तु। शिवा आपः संतु। सौमनस्यमस्तु॥ अक्षतं चारिष्टं चास्तु
दीर्घमायुरस्तु॥ द्विपदश्चतुष्पादेभ्यः स्तु शांतिर्भवतु॥ अस्य पौर्णमासयाग
कर्मणः प्रतिष्ठासिध्यर्थे हिरण्यदक्षिणां निःक्रययथादास्यमानं ड्यां वसमे वे
षिद्धाप्रणाय तुभ्यमहं संप्रददे। भगवत्यः ब्रूभीं गदेवता॥ सप्तकृभ्यः स्वाद
भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वः स्वाहा॥ २॥ अयाश्चाग्नेस्यनभिशस्तिश्च
सत्यमित्वमया असि। अया सामनसा हतो यासंहव्यमूहिषे। अया नः कृणु
हि भेषजं स्वाहा। प्रजापतये स्वाहा। स्कच्यग्नेमध्यं स्कवे मूलमाद्य स्वाहा। स्था
तानन्तु प्रहृत्या अग्ने वसोसीति। तिस्रः सामिधेन्याधाय यथोक्तपर्युक्षणं इद ॥४॥
मापः इत्यनेन। जनीं। पवित्रे ग्रंथिं हि पा। बर्हिर्होमः। प्रणीता विमोकः। ब्रह्म
णे पूर्णपात्रं दास्यमानं पूर्णपात्रं ब्रह्मन् तुभ्यमहं संप्रददे। उत्सर्जनं कर्म
णं तर्पणं च। अस्य पौर्णमासयागकर्मणः प्रतिष्ठासिध्यर्थे यथासंपन्नेना

कोशाक्ष

त्रयो वै यज्ञे क्रमायः संपन्नो योऽन्नेन यो विरिक्तं यद्वै यज्ञस्य संपन्नं तत्स्वर्गं यज्ञ
नं यद्वै रिक्तं तत्प्रजा स तत्रैव यजमानः स वर्ष्म नावाप्नोति॥२
नेन ह्याप्तिपर्यंतं न नोऽन्नेन। ब्राह्मणमेवं अहं तर्पयिष्ये। भगवत्याः कर्मांगदे
वताः प्रीयंतां तेन पंचोना शांतिः॥ त्रयो वै अस्य पौर्णमासयागस्य न्यूनाति
रिक्तं तत्सर्वं भवतां प्रसादात् विष्णोः प्रसादात् ब्राह्मणानां प्रसादात् सर्वं परि
पूर्णमस्तु॥ इदमग्नये। इदं ब्रह्माय। इदं सोमाय। इदमग्नये। इदमग्नीषोमाभ्यां॥
इदमग्नीषोमाभ्यां॥ इदमग्नये स्विष्टकृते। इदमग्नये। इदं वायवे। इदं सूर्याय। इदं प्रजा
पतये। इदमग्नये। इदं प्रजापतये। इति पौर्णमासे त्यागः समाप्तः॥ ॥ अथ दर्शेय
गाग्निरवाने॥ तत्र ग्रहणे॥ अग्नये विष्णवे इंद्राग्निभ्यो जुष्टं गृह्णामि २॥ त्र्यंसीचं
तुर्थं॥ अग्नये विष्णवे इंद्राग्निभ्यो जुष्टमासादयामि॥ अग्नये विष्णवे इंद्राग्निभ्यो वा जु
ष्टं प्रोक्षामि॥ आज्यभागांतं कृत्वा। चतुर्गृहीतं कृत्वा॥ अग्नये स्वाहा॥ विष्णवे
स्वाहा। इंद्राग्निभ्यां स्वाहा॥ अग्नये स्विष्टकृते स्वाहा॥ शेषं समानं पौर्णमास
वत्॥ त्यागः इदमग्नये। इदं विष्णवे। इदमिंद्राग्निभ्यां। इदमग्नये स्विष्टकृते।

इति दर्शयागः समाप्तः ॥ ॥ अथ पिंडपितृयज्ञो लिख्यते ॥ पिंडपितृयज्ञोपराह्णे
मावास्यायां अवसथ्याग्नेः पुरस्तात्कूर्पस्थालीं स्थाप्य । पात्रं यैः उत्तरस्य लघुमुष्टिं २
मेक्षणं चासेसाद्य ॥ आचमनं प्राणायामः ३ । स्वस्त्ययनं अद्येत्यादि यजमान
अपत्नीकस्य आत्मसंस्कारार्थं । अपसव्यं ॥ स्मार्ताग्नौ पिंडपितृयज्ञकर्माहं क
रिष्ये ॥ पश्चाद्दक्षिणाग्रेषु कुशेषु स्फ्यं शूर्पं वाग्रे निधाय । उपरिष्टाद्व्रीहीन्पात्र्यां पु
रस्तात्कूर्पस्थालीं नासाद्य । सव्यं जानु निनीय मुष्टिना व्रीहीन्गृह्णाति । ॐ पितृभ्यो
जुष्टं गृह्णामि ॥ यथार्थं विद्वान्स्ततः ससंस्यातूपत्न्या मस्तत्फलीकृतान् । आवस
थ्याग्नेः अपचित्य । अनिर्वापं प्रत्यं चरु द्वाश्रनं ॥ अवस्त्र विपरिसमुह्य । परिस्त
र्य पर्युक्ष्य । दक्षिणे जाचान्य । यज्ञोपवीती । प्राङ्मासीनो मेक्षणेन जुहोति । ॐ स ॥५॥
मितृ प्रजा० । अग्नये कव्यवाहनाय स्वाहा । सोमाय पितृमते स्वाहा । यमायांगिर
स्वते पितृमते स्वाहा ॥ मेक्षणमग्नौ प्रक्षिप्य । ततस्त्यागः इदमग्नये कव्यवाहनाय
इदं सोमाय पितृमते । इदं यमायांगिरस्वते पितृमते । अपसव्यं कृत्वा । अपहता०

द्द॥ दर्भा अनेन मंत्रेण अग्निर्दग्धा दक्षिणतः स्योनो नः ... ॥ येरूपाणि प्रतिमुंच
माना असुराः संतः स्वधया चरंति। परापुरो निपुरो ये भरंत्य ग्निष्टां लोकात्प्रणुदा द्यु
त्यस्मात्॥ इति उल्मुकं भूमौ पृष्ठस्य दक्षिणे द्वे द्वे निधाय॥ मूले कुशानुल्मुके भूमौ कु
मूले निधाय॥ तत्रैव अवनेजनं अमुक गोत्र पितः अमुक अमुक शर्मन् अव
नेनिक्ष्व॥ ये चात्र त्वामनु॥ एवं पितामह॥ एवं प्रपितामह॥३॥ अमुक गोत्र अमु पितः
क अमुक शर्मन् एतत्ते॥ एवं पितामह॥ एवं प्रपितामह॥ एवं पिंडदानं ये च त्वामत्रा
नु॥ अत्र पि॰ षतु॥ प्रत्यवनेजनं अमुक गोत्र पितः अमुक अमुक शर्मन् अवनेनिक्ष्व
ये चात्र त्वामनु॥ एवं पितामह ३ प्रपितामह॥ ॐ नमो वः पितरो जीवाय नमो वः पितरः शो
षाय नमो वः पितरो घोराय नमो वः पितरो रसाय नमो वः पितरो बलाय नमो वः पित
रो मन्यवे नमो वः पितरः स्वधायै नमो वः पितरः पितरो नमो वो ये अत्र पितरः पितर
स्थ यूयं तेषां श्रेष्ठा भूयास्त ये इह पितरो मनुष्या वयं तेषां श्रेष्ठा भूयास्म या अ
स्मिन् मरस्व क्षायुष्मांश्च साय इह पितर एधतु अस्मा अंसगृहान्नः पितरो दत्त॥ एत
नमो वः पितरो मन्यवे ३

न्य

इदं पितरो वासो वध्वं पितरः इति त्रिणि सूत्राण्युपंस्य॥ ऊर्जं वहंतीरमृतं घृतं पयः कौ-
लालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्॥ उदकशेषं निनीय अवघ्राय पिंडानव-
धाय प्राश्नीयात् ब्राह्मणाय वा दद्यात् अपो वाभ्यवहरेत्॥ मध्यमपिंडं पत्नी पुत्रका-
मा प्राश्नीयात्॥ आधत्त पितरो गर्भं कुमारं पुष्करस्रजं। यथेह पुरुषोऽसत्॥ अ-
नेन मंत्रेण प्राश्नीयात्॥ उल्मुकमग्नौ क्षिप्त्वा॥ सकृदाच्छिन्नान्युपहृत्य स्वयं हो-
मं न्वपवर्गः॥ ॥इति पिंडपितृयज्ञः समाप्तः॥ ॥अथ श्रवणाकर्म लिख्यते॥ विष्व-
देवस्य देवत्वं यथा अर्थं कृत्वा॥ अद्येत्यादि॰ श्रवणाकर्ममहं करिष्ये॥ ग्रहणं॥ विष्ण-
वे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्च जुष्टं गृह्णामि॥ उत्तरतश्चरुं धे॥ ग्रहणं
संस्कृत्य नांग्रहणं॥ विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यो जुष्टं मासा- ॥६॥
दयामि॥ विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्च जुष्टं प्रोक्षामि॥ उत्त-
रतः स्थाप्य॥ चरुं गृहीत्वा॥ ॐ विष्णवे स्वाहा॥ श्रवणाय स्वाहा॥ श्रावण्यै पौर्ण-
मास्यै स्वाहा॥ वर्षाभ्यः स्वाहा॥ स्विष्टकृतं यजमानः॥ सद्य ब्रह्म दक्षिणां ब्रह्मणादि

शेषं समापनीयं ॥ अत प्रभृति मार्गशीर्षपौर्णमासीपर्यन्तं रात्रौ रात्रौ उदबूदानां बलि
दानं सर्पेभ्य एव कुर्यात् ॥ सर्पबलिकर्मणि खते । गृहात् बाह्यतः स्थण्डिलं च
॥ स्थण्डिलादुत्तरतः प्रागग्रेषु नवेषु कुशेषु उदकुंभं नवं प्रतिष्ठाप्य ॥ होमार्थं लाजा
संस्कृत्य उत्तरतः स्थाप्य । अद्येत्यादि ॥ सर्पबलिकर्म महं करिष्ये ॥ स्वर्णोद्धारयां स्थ
ण्डिलं स्थण्डिले पञ्चसंस्कारं कृत्वा स्थापयेत् ॥ स्थण्डिले दिव्यानां सर्पाणामधिपतये
दिव्येभ्यः सर्पेभ्यो जुष्टं गृह्णामि ॥ इति तूष्णीं चतुर्थी ॥ लाजानां ग्रहणं ॥ दि
व्यानां सर्पाणामधिपतये दिव्येभ्यः सार्पेभ्यो जुष्टं मासादयामि ॥ दिव्यानां सर्पा
णामधिपतये दिव्येभ्यः सार्पेभ्यस्त्वा जुष्टं प्रोक्षामि ॥ उत्तराघारः ॥ दिव्यानां स
र्पाणामधिपतये स्वाहा ॥ दिव्येभ्यः सार्पेभ्यः स्वाहा ॥ सर्पबलिनीत्यासादनी
उदकं कंकतः स्नानं स्थण्डिले पुष्पा । आच्छादनं । अंजनं । आदर्श भात ॥ दिव्यानां स
र्पाणामधिपतिः खनेनि क्रोष्ट्वं त्रयाणां पृथक्कृ ॥ उदबूदानां दिव्यसर्पाणां
वने निर्जितामिति ॥ एवं त्रयाणामपि ॥ दिव्यानां सर्पाणामधिपतिः प्रतिष्ठितो

स्त्र

एवं त्रयाणां। दिव्याः सर्पाः प्रलिखंतां॥ एवं त्रयाणां। प्रोक्षणं मार्जनं॥ दिव्या
नां सर्पाणामधिपतिः प्रलिपतां॥ एवं त्रयाणां। चंदनं दिव्याः सर्पाः प्रलि
पंतां॥ चंदनं। दिव्यानां सर्पाणामधिपतिराबध्नीतां। आबध्नंतां॥ पुष्पं॥ दिव्याः स
र्पा आबध्नंतां॥ एवं पुष्पं पुष्पाय स्रजा॥ दिव्यानां सर्पाणामधिपतिराछाद
यतां॥ दिव्याः सर्पा आछादयंतां॥ अत्र तंतुमुपहरति॥ एवं सक्तं॥ दि
१ व्यानां सर्पाणामधिपतिराज्ञ्जनं॥ दिव्याः सर्पा आंजंतां। एवं पश्चात्सि मां
जनं। दिव्यानां सर्पाणामधिपतिरिक्षतां॥ दिव्याः॥ सर्पा ईक्षंतां। एवं बलौ
नां दर्शनं ईक्षणं। दिव्यानां सर्पाणामधिपत एष ते बलिः। दिव्याः सर्पा
एष वो बलिः॥ एवं षण्णां सक्तूनां बलिदानं॥ एवं ततो नंतरं॥ अंतरिक्षाणां ॥७॥
सर्पाणामधिपतिः रवने निक्तां॥ अंतरिक्षाः सर्पाणां मवनेनिजंतां॥ अं
तरिक्षाणां सर्पाणामधिपतिः प्रलिपतां॥ अंतरिक्षाः सर्पाः प्रलिपंतां॥ अं
तरिक्षाणां सर्पाणामधिपतिराबध्नीतां॥ अंतरिक्षाः सर्पा आबध्नंतां॥
अंतरिक्षाणां सर्पाणामधिपतिः प्रलिखतां। अंतरिक्षाः सर्पामधिपतिः प्रलिखंतां

एवं त्रयाणां फणिभ्यो मार्जनं॥

ऽर्यंतरिक्षाः सर्पाः इ त्वंतां ३

ओं अंतरिक्षाणां सर्पाणामधिपतिराच्छादयतां ॥ ओं अंतरिक्षाः सर्पा आच्छादयंतां
ओं अंतरिक्षाणां सर्पाणामधिपतिरांजूं ॥ ओं अंतरिक्षाः सर्पा आंजंतां ॥ ओं अंतरिक्षाणां
सर्पाणामधिपतिरीक्षतां ॥ ओं अंतरिक्षाणां सर्पाणामधिपतय एष ते बलिः ॥ ओं अंतरि-
क्षाः सर्पा एष वो बलिः ॥ ततोनंतरं दि[illegible]नां सर्पाणामिति एवं चतुर्विंशति सर्पाणां
प्रतिप्रति अष्टौ अष्टौ पदार्थाः कार्याः एवं पार्थिवानामिति ॥ ततः स्विष्टकृदादि समा-
पनीयं ॥ स्थाने पंचन्यू संस्कारा नू कृत्वा वक्ति स्थाने स्थापनीयः ॥ ततोनंतरं ऋषि-
तर्पणं उपाकर्म विश्वदेव सायंहोम अथ रात्रौ स्तु आभाणमिति शय्यारोहणं ॥
इति श्रावणीकर्म समाप्तः ॥ अथोपाकरणं लिख्यते ॥ आचमनादि ॥ ग्रहणे विशेषः ॥
प्र अग्नये ष्टणं सूर्य्यच्योग्नये शाकंत ब्रायागूये मित्रावरुणाभ्यामग्नये मरुद्भ्यो अग्नये अग्नये ६
देवेभ्यो अग्नये इंद्राभ्यो माभ्यामिं द्रायाग्नायामरुद्भ्यः सोमाय पवमानायाग्नये वि- याः १
श्वेभ्यो देवेभ्यो जुष्टं गृह्णामि ॥ शानकुं यवं अन्यत्र स्थाने धान्यानां च गृह्णा-
ति दधि घृतमिश्राणां जुहोति ॥ अग्नये त्वा जुष्टं सादयामि ॥ अग्नये वि-
श्वेभ्यस्त्वा जुष्टं प्रोक्षामि ॥ अग्निमीळे मधुच्छंदा अग्निर्गायत्री ॥ चतुर्गृहीतं ॥

अग्निमी॰ तमं स्वाहा॥ कुत्सुं न्नको गस्त्योन्नण स्त्र यत्त्रिष्टुप्॥ कुत्सुं न॰ विषं स्वा
हा॥ त्रमग्ने गृत्समदोग्निर्जगती॥ त्वमग्ने द्युभि॰ शुचिः स्वाहा॥४॥ अवि दान
गृत्समदः शकुंतलोजगती॥ आवदं त्वं॰ वीराः स्वाहा॥५॥ सोमस्य माविश्वा
मित्रोग्निस्त्रिष्टुप्॥ सोमस्य॰ षस्व स्वाहा॥६॥ गृणानाविश्वामित्रोजमदग्निर्वा
मित्रावरुणौगायत्री॥ गृणानो॰ वृधा स्वाहा॥७॥ त्वं ह्यग्ने वामदेवोग्निरष्टिः त्वं ह्य
ग्ने सद॰ च्चेतसं स्वाहा॥८॥ धाम ते वामदेवोग्निर्जगती॥ धामं ते॰ द्धर्मि स्वाहा॥९॥ अ
बोध्यग्निर्बुधगविष्ठिरावग्निस्त्रिष्टुप्॥ अबोध्यग्निः॰ छ स्वाहा॥१०॥ गेतानव
[illegible] मरुन्मरुतोजगती॥ गंतानोय॰ निदः स्वाहा॥११॥ त्वं ह्यग्ने चरद्वाजो
[illegible] त्रिष्टुप्॥ त्वं ह्यग्ने प्रथमो॰ ह धौ स्वाहा॥१२॥ योनःस्वा पायुर्देवा अनुष्टुप् ॥१८॥
[illegible] नः स्वो अ॰ रे स्वाहा॥१३॥ अग्निं नरो वसिष्ठोग्निर्विराट्॥ अग्निं नरो दीधिति॰
[illegible] स्वाहा॥१४॥ प्रतिच्य ह्व वसिष्ठ इडा सोमा व नुष्टुप्॥ प्रतिच्यक्रु॰ मह्वाः
स्वाहा॥१५॥ [illegible] सिन्धु गाथइंद्रोजगती॥ माचिदन्यधि॰॥ त स्वाहा॥१६॥ अग्नि

याहि षो नरिरश्वा मरुतोनुष्टुप्॥ आग्नेयाहि॰ र्मरिस्वाहा॥१७॥ स्वादिष्ट्या मधु
ष्ठं दासोमः पवमानो गायत्री॥ स्वादिष्ठया॰ सुतः स्वाहा॥१८॥ यत्तेराजन्नु
कश्यपः सोमः पवमानः पंक्तिः॥ यत्तेराजञ्छृ॰ स्व वस्वाहा॥१९॥ अग्ने
त्रैबृहस्त्रितोग्निस्त्रिष्टुप्॥ अग्ने बृहन्नुषसा॰ न्यस्थाः स्वाहा॥२०॥
तच्छंयोः शंयुर्विश्वेदेवाः शक्वरी तच्छंयो॰ ष्पदे स्वाहा॥२१॥ स्विष्ट
कृतोन्तकृत्॥ दधिक्राव्णो अकारिषमिति॥ तन्त्रशेषं समापन्न
येत्॥ ॥इति पाकरणं कर्मसमाप्तिः॥ इदमग्नये इदमपृणस्सूर्येभ्यः
इदमग्नये॥ इदं शाकेतकाय॥ इदमग्नये॥ इदं मित्रावरुणाभ्यां॥ इदम
ग्नये॥ इदं मरुद्भ्यः॥ इदमग्नये॥ इदं वैश्वदेवेभ्यः॥ इदमग्नये॥ इदमिन्द्रासोमाभ्यां
॥ इदमिन्द्राय॥ इदमग्नामरुद्भ्यः॥ इदं सोमाय पवमानाय॥ इदमग्नये॥ इ
दं विश्वेभ्यो देवेभ्यः॥ इदमाग्नये स्विष्टकृते॥ ॥इति त्यागः समा
प्तः॥ ॥अथ आग्रयणं लिख्यते॥ अथ मे वर्षे वृधिस्थायं तत्वा

वैश्वदेवपूर्वकं ॥ अद्येत्यादि ॥ श्यामाकान्नयणमहं करिष्ये
॥ग्रहणे॥ सोमाय जुष्टं गृह्णामि ॥३॥ त्रप्तं चतुर्थं ॥ श्यामाका
धान्यग्रहणं ॥ सोमाय जुष्टमासादयामि ॥ सोमाय त्वा जुष्टं
प्रोक्षामि ॥ चतुर्गृहीतेन त्वा ॥ सोमाय स्वाहा ॥ एकाहुतिहो
मः ॥ त्यागः इदं सोमाय ॥ स्विष्टकृत् ॥ ततः प्राशनविधिः ॥
हुतशेषपात्रे चरुये न्नत्वा ॥ प्रजापतयेयेति प्राशनार्थी
यं ॥ प्रजापतये त्वा गृह्णामि मय्यं श्रियै मय्यं यश
स्मय्यमन्नाद्याय ॥ अग्निमं च नराशनः श्रेयः समनि
इदं वा स्त्वया वृशेन शमशीमहि त्वा ॥ स नो मयोभूः पि ॥८॥
तवाविश स्वन्नां नोन्नव द्विपदे शं चतुष्पदे हुतशेषं अद्भि
रुपासित्वा प्राश्नाति ॥ ततः आचमनं ॥ अनेनेव प्रकारेण द्वि

तीयं प्राशनं ॥ पुनराचमनं ॥ अनेमाने वप्रकारेण तृतीयं प्राश
नं पुनराचमनं ॥ अमोसि प्राण तदृतं ब्रवीम्यमोसि सर्वी ऽ. न
सि प्रविष्टः ॥ स मे जरां रोगमपनुद्य शरीरादमामएधि मामृधा
म इन्द्र ॥ इति हृदयदेशमभिमर्शनं ॥ नाभिरसि माविभ्नीथाः
प्राणानां ग्रंथिरसि माविस्रसइति नाभिं ॥ तद्वक्षुरिति
ति यथा लिंगं ॥ तच्चक्षुरित्यादित्यमुपस्थानं ॥ आदित्यं
नमस्कृत्य शेषं समापनीयं ॥ ॥ व्रीहियाग्रयण ॥ यवा
ग्रयणं सिरवाते ॥ यवाग्रयणमहं करिष्ये ॥ ग्रहणे विशेषः इं
द्राग्निभ्यां विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां जुष्टं गृह्णामि
॥ उरक्षीच्य हथी ॥ इन्द्राग्निभ्यां विश्वेभ्यो देवेभ्यो द्यावापृथिवी
भ्यां जुष्टमास्मादयामि ॥ इन्द्राग्निभ्यां विश्वेभ्यो देवेभ्यो द्या

द्यावापृथिवीभ्यां जुष्टं स्वजुष्टं प्रोक्षामि। चतुर्गृहीतं। इंद्राग्निभ्यां
स्वाहा॥ विश्वेभ्यो देवेभ्यः स्वाहा। द्यावापृथिवीभ्यां स्वाहा॥ स्वि
ष्टकृत्। प्राशनविधिः श्यामाकाग्रयणे लिखितः। इति त्यागः।
10 इदमिंद्राग्निभ्यां॥ इदं विश्वेभ्यो देवेभ्यः। इदं द्यावापृथिवीभ्यां।
इदमग्नये स्विष्टकृते॥ इति व्रीहियवाग्रयणे लिखितं॥ अथ आ
युर्जीवकर्म लिख्यते॥ प्रथमवर्षे सूतकमध्ये न भवति॥ वृधश्रा
धश्राधं विश्वदेवपूर्वकं। अद्येत्यादि॥ आयुर्जीवकर्म लिख्यते॥ पा ॥१०॥
यसश्चरुः कर्तव्यः अवहणे। इंद्राय जुष्टं गृह्णामि॥ शंनस्तेऽ इंद्राय
जुष्टमासादयामि॥ इंद्राय स्वजुष्टं प्रोक्षामि॥ आज्याधिश्रय
णे कांस्यपात्रकस्याधिश्रयणं॥ दुग्धे गव्ये घृतमिश्रं स्वपात्रके॥ आज्यसं
स्कारः॥ चरोर्मध्ये कुंभे ऽवक्षेपः चतुर्गृहीतं॥ इंद्राय स्वाहा॥ चरोरेकाहुतिं जु
हुयात्॥ सर्वं केवलमाज्यद्रव्यागमः॥

...वैनौ कुर्मि भ्यां स्वाहा ॥ अश्वयुग्भ्यां स्वाहा ॥ आश्वयुजीपौर्णमास्यै स्वाहा ॥ श
रदे स्वाहा ॥ पशुपतये स्वाहा ॥ पिंगलाय स्वाहा ॥ इति षडाहुतीराज्येन जुहुया
त् ॥ अथ पृषातकहोमः ॥ आगावो अग्मेनित्युते नक्र केनर्चं अष्टौ आहुती
र्वेण जुहुयात् ॥ पृषातकेन देसमवद्यासि स्विष्टकृदादि शेषं तत्र समा
पनीयं ॥ रात्रौ तस्यामेष गोः सार्धं वत्सस्य सर्जनं ॥ सकलां रात्रीं प्रातः ब्राह्मणभो
जनसंकल्पः ॥ तत्र प्रयोगः ॥ अद्येत्यादि॰ वत्ससंसर्जनकर्मसमृध्यर्थं॰ ब्राह्मणमे
कमहं तर्पयिष्ये ॥ त्यागः ॥ इदमिंद्राय ॥ इदमश्विभ्यां ॥ इदमाश्वयुग्भ्यां ॥ इदमाश्वयु
जीपौर्णमास्यै ॥ इदं शरदे ॥ इदं पशुपतये ॥ इदं पिंगलाय ॥ इति आश्वयुज्यां आश्वयुजीकर्म
समाप्तः ॥ ॥ अथ मार्गशीर्षीपौर्णमासीकर्म लिख्यते ॥ अद्येत्यादि आग्रहणक
र्ममहं करिष्ये ॥ श्रवणाकर्मविना अपबालिप्रभृति सर्वकर्मसमानं ॥ पूर्ववत्
अपार्णअंति सर्पत्र अष्टौ अष्टौ पदार्थाः कर्तव्याः ॥ ततः स्विष्टकृतः ॥ तत्र शेषं स
मापनीयं अपर्णाविसर्जनं ॥ ॥ इति मार्गशीर्षीपौर्णमासीकर्म समाप्तः

विराजाय स्वाहा॥

अथ पुनराग्रहायण्यां॥ कर्म लिख्यते॥ आज्यभागांते ऋचा। स्रुवेण प्रथ-
म होमः। ग्रीष्मो हेमंत उत वा वसंतः शरद्वर्षाः सुकृतं नो अस्तु। तेषामृतूनां श-
तशारदानां निपात एषामभये स्याम स्वाहा॥ अपश्वेतपदा जहि पूर्वेण चापरेण च।
सप्त च वारुणीरिमाः सर्वाश्च राजबांधवैः स्वाहा॥ श्वेताय वैदार्व्याय स्वाहा॥ वि-
ए स्वाहा दार्व्याय स्वाहा॥ तक्षकाय वैशालेयाय स्वाहा॥ इति षडाहुतीर्जुहुयात्॥ ततो हेमंतः
सुवसंतः सुग्रीष्म प्रतिधीयतां सुवर्षाः। ऋतुनो वर्षाः शरदः शं नो भवंतु नः इत्युप-
स्थानं॥ स्विष्टकृदादिशेषं समापनीयं॥ रात्रौ शयनविधिर्लिख्यते॥ हमिदं शीर्षं-
नामि त्र इति मंत्रेण पलाशशाखया मार्जयेत्। अमुमुद्रा दूमिरित्युल्लेखनं॥ स्यो-
ना पृथिवी नो भवेति दर्भास्तरणं॥ प्रथमतः ज्येष्ठः दक्षिणतः पत्नी वा। इतरे उत्तरतः
वह्यमाणमंत्रैः प्राक्शिराः स्वपेयुः॥ प्रतिब्रह्मन् प्रतितिष्ठामि इति मंत्रेण ब्रांतेन दक्षि-
णेः॥ प्रत्यश्वेषु प्रतितिष्ठामि। गोषु प्रचैः स्वपेयुः॥ उकारांतेन मंत्रेण प्रतिपश्चिमु-
प्रतितिष्ठामि पुष्टौ॥ अकारांतेन दक्षिणेः॥ प्रतिप्रजायां प्रतितिष्ठाम्यन्ने इति प्र-
ख्येः॥ उदीर्ध्वं जीव इत्युपस्थानं। सकलामेव रात्रीं स्वस्तरे शयनं॥ अतो यथासुखं ॥११॥

भवति॥ हविः ... समाप्तः॥ ॥अथ धूमपातनकर्म लिख्यते॥ ॥अद्ये
त्यादि०॥ धूमपातनकर्म महं करिष्ये॥ ॥प्रातः प्रतिपदि ग्रामि पलाश मधुक अपामार्ग
शरीष उदुम्बर॥ कुशतरुण॥ बदरीणां च॥ एषां मुष्टिं कृत्वा॥ हुतो कर्षितं मधं उदपात्रे
कृत्वा॥ महाव्याहृतीः सावित्रीं च॥ अपनः शोशुचदघमित्येतैरष्टभिर्मंत्रैः सप्तग्रावेः
...तृमंत्रं धूमसाद्विपातनं कुर्यात् यावंती गृहाणि भवंति तेषु सर्वेषु मंत्रावृत्तिश्चक
र्तव्याः॥ ततोऽग्रे रुत्तरतः प्रादशे उदपात्रं धूमसाद्वि मार्जनं काष्ठानि च निनयेत् त
५) तः मधुरैः हविर्दक्षिणा॥ दधि मधु घृतं मधुपर्कं॥ धूमसाद्विपातनकर्मणः समर्थ्यार्थं म
धुपर्कं दक्षिणां ब्रह्मणे च तुभ्यं ददे॥ ॥धूमसाद्विपानकर्मः समाप्तः॥ ॥अष्टकाक
र्म लिख्यते॥ मृदश्राद्धं न भवति॥ अद्येत्यादि०॥ शाकाष्टकाकर्म महं करिष्ये॥ काल
शाकचरुः चिह्नं कृत्वा ग्रहणे॥ अद्येत्यादि० उपसेजुष्टं गृह्णामि॥३॥ त्रष्फीस्वि चतुर्थी
॥उपसे जुष्टमासादयामि॥ उपसे वा जुष्टं प्रोक्षामि॥ चरुं गृहीतं॥ इयमेव सा याप्र
थमा व्युच्छदंतरस्यां चरति प्रविष्टा॥ वधूर्जजान नवगज्जनित्री त्रय एनां महिमा
नः सचंतां स्वाहा॥ यस्यां वैवस्वतो यमः॥ सर्वे देवाः समाहिताः॥ अष्टका सवतो

स्वाहा

मुखं। विसृजामेवामानतीर्नृपतूँ॥ आकुस्तोग्रावाणोदं तान्वथः पवमानः॥ मासा
श्राद्धे मासाश्च नमस्तेस्तु मनीमुरिवस्वाहा॥ शेषं शंभापनीयं॥ ततो मध्यमाष्टका
विस्यते॥ पौरवस्यापरपक्षेन्नवति॥ वैश्वादेवस्य वर्ज्जं॥ अद्यात्यादि॥ मोऽर्मप्रेष्ठका
कर्ममहं करिष्ये॥ आचमनं॥ प्राणायामः॥ स्वस्त्ययनं च वा॥ ततो अपसव्यो॥ स
मग्रे कर्मसंकल्पपरिसमूहनं॥ दक्षिणतः आरभ्य आघाटकं कुर्जात्॥ ब्रह्मासनं
पश्चिमतः कुर्यात्॥ प्रणीतासनं पूर्वतः आसादनी अपि पूर्वस्यां दिशि दक्षिण
तः आरभ्य उदक्संस्थान्नवति॥ अपदक्षिणं सकृत्स्तरणं॥ सकृत् अपदक्षि
णं पर्युक्षणं॥ पितृभ्यो जुष्टं गृह्णामीति ग्रहणं॥ तंदुलानां ग्रहणं॥ पितृभ्यो जु ॥१२॥
ष्टं मासादयामि॥ पितृभ्यस्त्वा जुष्टं प्रोक्षामि॥ पायसश्चरुः॥ ततः चरोः तारित्वा
गृहीत्वा पात्रे कृत्वा च श्रतं चरुं॥ प्रतिधार्य पश्चिमतः॥ उदगुद्वासनं॥ आज्य
न्यागानंतरं स्रुवेण उपस्तीर्य॥ वपां गृहीत्वा॥ पुनर्द्वि रभिघार्य॥ वहवपां जा
तवेदः पितृभ्यो यत्रैनान्वेत्थ सुकृतस्य लोके॥ मेदसः कुल्या उपताः स्रवं

२५

उसन्त्याः संत्वयजमानस्याष्टकामाः स्वाहा॥ इति जुहुयात्॥ ततश्चरोः स्रुवेण
उपस्तीर्य एकत्रावदानं गृहीत्वा पुनर्द्विरभिघार्य वाङ्गतिन्निश्चरुमन्त्रैः सप्रणवे
स्वाहाकाराहुतिर्हुत्वा पित्र्याष्टकायां सर्वाणि वावदाय सकृत्प्राचि॥ अभिघारो
द्विरेवायाः सर्वत्र श्रुतिदर्शनायात् इति कारिकायामुक्तं॥ ततः येतावनुरिति चत
स्त्रिर्मन्त्रैः प्रतिमन्त्रं सप्रणवे स्वाहाकारां तत्र तन्त्र आहुतीर्हुत्वा॥ आज्य आहु
तीः पितृतीर्थेन जुहुयात्॥ समिदादिसर्वं पितृतीर्थं बर्हिपर्यन्तं होतव्यं॥ ततो य
स्यां विवस्वत इति॥ स्विष्टकृत् हुते स्विष्टकृते अनुमतये स्वाहा॥ आज्या
हुतीर्जुहोति॥ शेषं समापनीयं॥ सव्येन शान्नन्द्राग्नीं जपेत्॥ प्रातर्नवम्यां वि
श्वेदेवपूर्वकं अन्वष्टका श्राद्धं कर्तव्यं॥ आज्यमनादि॥ शंनरंदाग्निपर्यन्तं ए
षु विधिः॥ नात्र पदे नन्नवति॥ न्यूनाधिकं किमपि नाइति॥ पिंडपितृयज्ञपूर्वकं
अन्वष्टका श्राद्धं॥ ॥इति मासाष्टकासमाप्ता॥ ॥अथ उत्सर्गौ त्वमाष्टका
नु क्रियते॥ अहोन्यादि॥ अष्टपाष्टकाकर्म मह्यं करिष्ये॥ तंदुला पिष्टा इत्येत्ता

ष्टकायै जुष्टं गृह्णामि ॥३॥ चतुर्थेन तूष्णीं ॥ अष्टकायै जुष्टंमासादयामि ॥ अष्टका
यै वा जुष्टं प्रोक्षामि ॥ ग्रहणानंतरं ॥ त्रयाणां अपूपानां श्रपणं ॥ पृथक्कपा
ले वृतेन श्रपणं ॥ शृतेषु तान्निधारः ॥ प्रत्यभिधारश्च ॥ आज्यभागानंत
रं अपूपानां होमः ॥ स्रुच्युपस्तारः त्रयेभ्यः पृथक् ॥२॥ पृथक् ॥ अवदानं
गृहीत्वा ॥ पात्रे सर्वान् स्रुचि प्रक्षिपः ॥ पुनरपि एवमेव गृहीत्वा ॥ प्रक्षिप्य उ
पस्तीर्य एवं चतुर्गृहीतं कृत्वा ॥ उक्थ्यातिरात्रश्च यज्ञः क्रतुश्छंदसा सह ते
13 पूपं तद्दृष्टाकं नमस्ते सुमना मुखि स्वाहा एवं आहुतीर्हुत्वा अनेन प्रका
रेण अपूपेभ्यः त्रिरवदानं गृहीत्वा ॥ स्रुचि द्वावाघारौ अभिघार्य यस्यां ॥१३॥
विवस्वत इति स्विष्टकृतं जुहुयात् ॥ शेषं समापनीयं ॥ इत्यष्टकाकर्मसमाप्तः ॥
॥४॥ ॥ अथ चैत्रीकर्म लिख्यते ॥ ॥ प्रथमवर्षे विश्वदेवपूर्वकं वृद्धिश्राद्धं ॥
आघारादि ॥ ॥ चैत्रीकर्ममहं करिष्ये ॥ ग्रहणे ॥ इंद्राग्निभ्यां जुष्टं गृह्णामि ॥३॥
चतुर्थेन तूष्णीं ॥ इंद्राग्निभ्यां जुष्टंमासादयामि ॥ इंद्राग्निभ्यां जुष्टं प्रोक्षामि ॥

वौ

पिष्टस्य ग्रहणं ॥ पिष्टस्य पुरुषाकृतिं कृत्वा ॥ त्रिरवदानं कृत्वा ॥ रुद्राय जुष्टं
गृह्णामि ॥ स्रुच्यां चतुर्थं ग्रहणं ॥ रुद्राय जुष्टमासादयामि ॥ रुद्राय त्वा जुष्टं प्रोक्षामि
॥ ततः त्रयाणां गोलकानां करणं ॥ पृथक् पृथक् परिश्रपणं ॥ एकैकं परिवाणि बदरी
पत्राणि कृत्वा ॥ ततः पिष्टमयानि अष्टाविंशति नक्षत्राणि कृत्वा ॥ ततः किंनरयु
ग्मं ॥ चक्रवाकयुग्मं ॥ क्रौञ्चयुग्मं ॥ एतदपि पिष्टमयानि कृत्वा ॥ अथ कुपात्रे श्रप
यित्वा संस्कृतानि बदरीपत्रादीनि कर्मांते ब्राह्मणाय दद्यात् ॥ ततश्च शृंगेषु श्रुते
षु श्रुतान्निघारः ॥ श्रुतानां उदगुद्वासनं ॥ प्रत्यन्निघारश्च ॥ आज्यभागांते
चतुर्गृहीतं कृत्वा ॥ इन्द्राग्निभ्यां स्वाहेति होमः ॥ ततः गोलकेभ्यः प्रतिगोलकं
त्र्यवद्यपात्रांतरं कृत्वा ॥ स्रुचि त्र्यवदानं कृत्वा ॥ पुनरन्निघार्य ॥ रुद्रा
य स्वाहेति जुहुयात् ॥ ततः ऐन्द्राग्नेः पुरुषात् एकं त्र्यवदानं गृहीत्वा रौद्रेभ्यो
गोलकेभ्यः प्रतिगोलकं त्रीन् एव चतुरवदानं गृहीत्वा ॥ स्रुचि उपस्तारं कृत्वा
कं तु हुत्वा ततो हिरन्निघार्य स्विष्टकृतं जुहुयात् ॥ तत्र शेषं समापनीयं ॥

इतित्रेचीकर्मसमाप्तः॥ ॥अथप्रवासविधिर्लिख्यते॥ २मांमेमित्रा
वरुणौगृहान्गोपायतंयुवं॥ अविनष्टानविह्रुतान्पूषैन्मानभिरक्षतु॥
अपिपंथामगन्महीतिद्वौमंत्रौजपित्वाव्रजेत्॥ ॥इतिप्रवासविधिः॥
आचमनादि॰ शुचिर्भूत्वा॥ ततः गृहामाबिभीतमावेपध्वमूर्जंबिभ्रत
एमसि॥ ऊर्जंबिभ्रद्वःसुमनाःसुमेधागृहानैमिमनसामोदमानः॥ ये
षामध्येतिप्रवसन्येषुसौमनसोबहुः॥ गृहानुपह्वयामहेतेनोजानं
तुजानतः॥२॥ उपहूताइहगावउपहूताअजावयः॥ अथोअन्नस्यकी
लालउपहूतोगृहेषुनः॥३॥ अपन्नोअग्निर्नगवानयंनोन्तगवन्नरः॥ ॥१४॥
अस्योपश्नद्यमारिषामायंश्रियंदधातुनः॥४॥ इतिजपित्वाकल्याणींवा
चंब्रूयात्॥ विराजोदोहोसिविराजोदोहमशीयमयिपद्यायैविराजो
दोहः॥ अनेनमंत्रेणपद्यार्थमुदनपादप्रक्षालनं॥ ॥इतिगृहाग
मनविधिःसमाप्तः॥ ॥अथसर्वाग्निनशेप्रायश्चित्तंलिख्यते॥ आच

प्राह्निनोऽग्नयेधमेस्वाहा। प्राह्निनोविश्वेभ्योदेवेभ्यःस्वाहा। यज्ञंप्राह्निविन्दावसोस्वाहा।८

मनं प्राणसमः॥ त्रयं परिसमूहनं॥ आखाटकं पवित्रछेदनं॥ विष्णुर्त्या वित्य
न्युदूतं॥ कुशैतरुणान्यांप्र दक्षिणमग्निं त्रिः पर्युक्ष्य॥ महीन्नांपयोसीत्या
ज्यस्थालीमादाय। इषेत्वेत्यधिश्रित्य॥ स्रुवः प्रतपनं। ऊर्जेत्वेत्युदगुद्वास्य॥
सवितुष्ट्वेत्युदकसंस्कारः॥ कुशास्रुवयोर्ग्रहणं॥ ॐ विष्णोर्हव्यं रक्षासि। समित्॥
प्रजापतयेस्वाहा॥ स्रुवेणाज्याहुतिः॥ ॐ भूर्भुवः स्वः स्वाहा॥ अयाश्चाग्नेऽसि स्वा
हा। सर्वंपादिशतक्रतोस्वाहा॥ अमंत्रकं पवित्राभ्यामग्निं पर्युक्ष्य विसृजेत्॥
कुशाकर्मापचयः। अग्नेस्त्वं नः शं न इंद्राग्नी इति जपेत्॥ आसादनि। पवित्रछेद
नानि॥ आज्यं। स्रुवं। समिधं। कुशान्॥ इति सर्वाग्निनाशे प्रायश्चित्तं समाप्तं॥
॥ आवसथ्यस्य प्रतिपत्तिः॥ वपनं। नखनिकृंतनं॥ आप्लुत्या अलंकृत्य।
चंदनपुष्पादिपिंडधरणं॥ यजमानं अग्निं च शकटेनीत्वा॥ तीर्थश्मशानन्तमे
वा नीत्वा॥ अपसव्यं। सर्वत्र दक्षिणाभिमुखं कर्म॥ अपेतवीतेति॥ पलाशशाखै
स्वशाखाभिः संमृज्य॥ स्फ्येनरेषां कृत्वा॥ अभ्युक्ष्य॥ उपलेपनं सर्वत्र। तत्र चिता

नुकृत्वा॥ पिंडं कृत्वा दक्षिणाग्रैः काष्ठैः चितां कृत्वा तेपं चन्द्रसंस्कारानुकृत्वा॥
पश्चिमेऽग्निं स्थाप्य॥ उत्तानं चितायां शवं मुक्त्वा॥ दक्षिणकरे पिंडदान॥ श्रो
त्रे हिरण्यशकलानि मुक्त्वा॥ दक्षिणहस्ते स्रुक्॥ दधिघृतेन स्रुवं वामपा
णौ पूरयित्वा॥ नासिकयोः स्रुवौ॥ प्रणीतापात्रं पृषदाज्येन पूरयित्वा॥
सव्यकरे॥ स्फ्यं दक्षिणपाणौ॥ कर्णौ दध्युदूखलं॥ पिंडिकायां मुसलं॥
पादयोः शूर्पं॥ शेषाणि पात्राणि पादतः॥ अग्निं प्रज्वाल्य॥ अयं वै त्वमस्मा च६
दनेन मंत्रेण दक्षिणप्रदेशे शिरसि हस्तं गृहीत्वा॥ अमुकसगोत्र अमु
कप्रेत अमुकशर्मन् स्वर्गाय लोकाय स्वाहा॥ मिनमग इति मं मदाह्ये दश ॥१५॥
डपिंडा॥ ततः शांतायां सव्याहृतः॥ चितां अवलोकयते॥ ईशान्यां गच्छं
ति॥ मृत्योः पदमित्यनुमंत्रयते द्वाभ्यामृग्भ्यां सपिंडानीं प्रदक्षिणं करोति॥
आपो हिष्ठाभिर्नाचम्यो मे तिस्रकाभ्यां स्नानं कुर्वंति॥ असावेतन्नस्त्वे
कमुद्दकांजलिं ददाति॥ आपो अस्मान्मातरः॥ उदकान्तर्बर्हिरुत्तीर्यंति

उदकरित्या दित्यमुपस्थाप्यं॥ नद्युद्भवैरग्रहं गछंति। उदपात्रद्वर्वायवस
र्वपं गोमय समीपे कृत्वा॥ अस्मन्वतीरीयति अनेन द्युतान्वच्छपाषाणं अ
ग्निमुदपात्रं स्पृशति॥ ॥इति आवश्यस्य प्रतिपत्तिः समाप्ता॥ ॥
शरीरेष्वदर्शमानेषु पुत्तलकविधिः॥ कर्त्तव्यः॥ तीर्थे गत्वा॥ स्नानं॥ ततः कु
शैन पुत्तलकं कृत्वा॥ चतुर्विंशतिरंगुलप्रमाणं स्थाप्य॥ पलाशवृंतानि॥
॥३६०॥ यथास्थाने कृत्वा॥ ऊर्णसूत्रेण बंधायतु॥ यवचूर्णेन प्रतिप्यन्नक्र
डिनोपरिस्थापयेत्॥ ४०॥ मस्तके॥ १०॥ ग्रीवा॥ १००॥ बाह्वोः॥ २॥ ३०॥ हृदये॥ ... प्रपयोः
॥ २०॥ उदरे॥ ४॥ शिश्ने॥ ६॥ वृषणयोः॥ १००॥ उर्वी॥ २॥ जंघा॥ २॥ जानु॥ २॥ ३०॥
पादौ अंगुलीवृंताकं वृषणयोः॥ शिश्ने गर्जरी॥ चक्षु मध्ये॥ मेदस्थाने मृत्तिका॥
धातुस्थाने गंधक॥ हरियाल॥ केशस्थाने शूकरकेश॥ रोमे कुष्ठकुण
कपाट॥ नालिकेर मस्तके॥ तुंबड़ूं कपाले॥ दाडिमकुलीदंतानां॥ नख
स्थाने वाल॥ आंत्रकमलनाल॥ पीतल जिह्वा मध्ये॥ मूत्र गोमूत्र॥ गात्रमल

संज्ञी तपापमरणे प्राप्त मरणादुः तत्र सर्पयोन्यादि नमस्त पत्रे तन्नो निर्वपति ...
... यजमान शरीर ... पंचगव्यादि समस्त ... चिताग्नौ ... तपामृत्यादिनाद्य
... संस्काराद्यं ...

...। सार्वाग्रं धिवातो न्यञ्कु कपर्दिका॥ चिणोर्ठ नीवीके। नासिकापटु
स्तत्र। मुखे पंचरत्नं। एवं विधिं पुत्तलकं कुर्यात्। ततः अद्येत्यादि०॥ गोत्र
स्य अमुकप्रेतस्य म्लेच्छादिनाहस्तेनैः शस्त्रघात मरणोत्पन्न दोष परिहा
रार्थं पुत्तलक विधिमहं करिष्ये। विष्णुपूजां समाप्य स्त्रुप्रोक्षितं कुर्यात्॥
पूर्ववत् प्रयोगं कुर्यात्॥ गोत्रस्य प्रेतस्य दुर्विज्ञे पापमरणेनोत्पन्न पापा
पनुत्यर्थं दहनादि उर्ध्वदेहिककर्मयोगताप्राप्त्यर्थं त्रिंशति प्राजापत्या
त्मके प्रायश्चित्ते प्रति प्राजापत्यं द्वादशआत्मान्नेन परिगणनया यथा
शंपंनेन आमान्नेन षष्ठित्यधिकशतेत्र यत्आमान्न प्रत्याम्नाये यथाद
स्यमानं द्रव्यं विष्णुप्रीत्यर्थं कस्मैकस्मैचि द्ब्राह्मणाया हं संप्रदे॥
भगवान् विष्णुः प्रीयितां। अनेन नक्त तथा प्रायश्चित्तेन गोत्रस्य प्रेतस्य दह
नेकर्मयोग्यताप्राप्नोः॥ ततो नारायणबलिः। ततः षट् पिंडाः। पुत्तलकस्य
दाहं ... विधानादि आयश्रध्याकर्म समाप्तिः॥ दृष्टोदिविविधाने

... सर्वं ... यत्रेयमपि स्मृतं पठेत्॥ २

न पुनः वैश्वदेवं कृत्वा भोजनं ॥ एवं प्रत्यहं पौर्णमासीपर्यंतं ततः पौर्णमास्यां म
ध्याह्ने लौकिके वैश्वानरे समिधं प्रक्षिप्य तेन पाकं कृत्वा गृह्योक्तः प्रकृति
वै[illegible]श्वदेवपाकेन व्रतं । वैश्वानरं रक्षित्वा सायं प्रातर्होमः । पक्षादिकर्मै
कृत्वा ॥ पुनरपि पक्षहोमः ॥ समारोपश्च ॥ यस्मिन् दिने गृहमागच्छति
तद्दिने तत्कालं स्नानं कृत्वा स्थंडिले लौकिकमग्निं स्थापयित्वा तत्र समि
धं प्रक्षिप्य ॥ तत्र नित्यं प्रकृतिवत् ॥ गृह्योक्तविश्वदेवं कृत्वा भोजनं
कुर्यात् ॥ सायंकाले होमं कृत्वा । विश्वदेवं कुर्यात् ॥ इति प्रवासे वैश्वदे
वविधिः ॥ समाप्तः ॥ अथ शांते गोप्रायश्चित्तं कृत्वा लिख्यते ॥ आचमनं प्रा
णायामः ३ आसादयेत् दर्भाः पवित्रे नछेदना नि आज्यं स्रुचः समित् उ
परस्तरः । पंचवस्त्रसंस्कारः ॥ अग्निं प्रणयामि । पसरिसमूहनं ॥ आपात्रे
वक्षाप्रसनं । आज्यासनं च । पवित्रं प्रादेशेन मापयित्वा ॥ द्वे पवित्रे स्थः
चे[illegible] कृत्वा तत्कृणान्त्यां ॥ महीनां पयोसि । इषे त्वा [illegible] तपनं ॥

प्रोक्षणं कुर्जीत ॥ सवित्र पूत्वाज्य संस्कारः ॥ एकं समिधं जुहुयात्
ॐ विष्णो हव्यं रक्षस्व ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ ॐ अग्नये स्वाहा
श्रद्धायं वो दानः ॥ ययोरोजसा स्कभिता उदकेन प्रोक्षणं ॥ अस्कान द्यौ
ः पृथिवी लोकः ...तिप्रयाश्च विश्वदेवः ॥ एषि कुर्यात् जनशान्तये
प्रायश्चित्तं समाप्तः ॥ ॥ श्री ॥ ॥ अयं ते योनिरृत्वियो यतो जा
तो अरोचथाः ॥ तं जानन्नग्न आरोहाथा नो वर्धया रयिं ॥ समिधि पाउ
वानो मंत्रः ॥ उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह हुत
प्रजानन् ॥ आयुः प्रजां रयिमस्मासु धेह्यरिष्टो दीदिहि नो दुरोण
स्वाहा ॥ समिधि होम वानो मंत्र ॥ ॥ श्री ॥ ॥ इति आवसथ्याग्नेः
॥ संवत १९७१ वर्षे
कर्म होमादि विधिः समाप्तः ॥ ॥ श्री ॥
श्रावण शुदि ५ भृगुवासरे श्री महीनर्मदयोर्मध्ये श्रीवटपद्र
वास्तव्याः ... नागरज्ञातियमहं वच्छशादाफलकेन लिखितं ॥
राउल नारायण ... ॥ श्री ॥ ॥ छ ॥